वृत्तखातदर्शनाय ।




व्यासः । १० । वेधः । ५ । अत्र सूक्ष्मपरिधिः $\frac{३९२७}{१२५}$ । सूक्ष्मक्षेत्रफलम् $\frac{३९२७}{५०}$ । वेधगुणं जातं सूक्ष्मखातफलम् $\frac{३९२७}{१०}$ । सूक्ष्मसूचीफलम् $\frac{१३०९}{१०}$ । यद्वा स्थूलखातफलम् $\frac{२७५०}{७}$ । सूचीफलं स्थूलम् $\frac{२७५०}{२१}$ ।

इति लीलावत्यां खातव्यवहारः समाप्तः ॥

खात्रं, क्ली, (खनु विदारे + "उषिखनिभ्यां कित् ।" उणां । ४ । १६१ । इति त्रन् किच्च ।) खातम् । खनित्रम् । इत्युणादिकोषः ॥ दारणम् । वनम् । सत्रम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (जलाधारविशेषश्च । इति उज्ज्वलदत्तः ॥ )

खाद, ऋ भक्षणे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । ऋदित् ।) ऋ, अचखादत् । इति दुर्गादासः ॥

खादकः, त्रि, ( खाद् भक्षणे + ण्वुल् । ) ऋणग्रहीता । खातक इति ख्यातः । इति मिताक्षरा ॥ भक्षकः । यथा,—

"विक्रयैर्गोविनिमयैर्दत्त्वा गोमांसखादके ।
व्रतं चान्द्रायणं कुर्य्याद्वधे साक्षाद्वधी भवेत् ॥"
इति प्रायश्चित्ततत्त्वे गोभिलः ॥

खादनं, क्ली, ( खाद् + भावे ल्युट् । ) भक्षणम् । आहारः । (खादति चर्व्वयत्यनेन इति ।) दन्ते पुं । इति हेमचन्द्रः ॥

खादितं, त्रि, ( खाद + क्तः । ) भक्षितम् । इत्यमरः । ३ । १ । ११० ॥ खाओया इति भाषा ॥ ("अशितं खादितं पीतं लीढं कोष्ठगतं नृणाम् । तज्जीर्य्यति यथाकालं शोषितं पित्ततेजसा ॥" इति शारीरस्थाने चतुर्थेऽध्याये सुश्रुतेनोक्तम् ॥)

दिरसारः, पुं, (खदिर + स्वार्थे अण् ततः षष्ठीतत्पुरुषः ।) खदिरवृक्षनिर्यासः । खयर इति भाषा ॥ तत्पर्य्यायः । खादिरः २ अद्भुतसारः ३ सत्सारः ४ रक्तदः ५ रक्तः ६ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफवातव्रणकण्ठामयनाशित्वम् । रुचिकारित्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ खदिरसारोऽपि पाठः ॥ ( यथा,—

"विना खदिरसारेण हारेण हरिणीदृशाम् ।
अधरे जायते रागो नानुरागः पयोधरे ॥"
इति उद्भटः ॥)

खादुकः, त्रि, (खादति हिनस्ति इति । खाद् + उन् संज्ञायां कन् ।) हिंस्रालुकः । इति हारावली ॥

खाद्यं, त्रि, (खाद्यते इति । खाद् + कर्म्मणि ण्यत् ।) भक्षणीयद्रव्यम् । यथा,—

"कस्त्वं भद्र खलेश्वरोऽहमिह किं घोरे वने स्थीयते शार्दूलादिभिरेव हिंस्रपशुभिः खाद्योऽहमित्याशया ।" इत्युद्भटः ॥

खानपानं, क्ली, (धातूनामनेकार्थत्वात् खे भक्षणे + भावे ल्युट् खानम् । पा पाने + भावे ल्युट् पानम् । खानेन सह पानं यद्वा खानञ्च पानञ्च तयोः समाहारः ।) कठिनद्रवद्रव्ययोर्गलाधःकरणम् । खाना पिना इति हिन्दी भाषा ॥ यथा, गारुडे नीतिसारे १०९ अध्यायः ।

"सद्भावेन हि तुष्यन्ति देवाः सत्पुरुषा द्विजाः ।
इतरे खानपानेन वाक्प्रदानेन पण्डिताः ॥"

खानिः, स्त्री, ( खन + इन् । पृषोदरात् वृद्धिः ।) खनिः । इति हेमचन्द्रः ॥

खानिकं, क्ली, (खानेन खननेन निर्वृत्तं इति ठञ् ।) कुड्यच्छेदम् । इति त्रिकाण्डशेषः ॥ देयालेर गर्त्त इति भाषा ॥

खानिलः, त्रि, ( खानं खननं शिल्पत्वेनास्त्यस्य । इति बाहुलकात् इलच् । ) भित्तिचौरः । इति शब्दरत्नावली ॥ सिंदेल चोर इति भाषा ॥

खानी, स्त्री, ( खानि + वा ङीष् । ) खनिः । इति शब्दरत्नावली ॥

खानोदकः, पुं, ( खानाय पानार्थं उदकमत्र । ) नारिकेलः । इति त्रिकाण्डशेषः ॥

खापगा, स्त्री, ( खे आकाशे स्थिता खात् आगता वा आपगा नदी ।) गङ्गा । इति हेमचन्द्रः ॥

खारः, पुं, ( खं अवकाशमाधिक्येन ऋच्छतीति । ऋ + अण् ।) खारीपरिमाणम् । इति हट्टचन्द्रः ॥

खारिः, स्त्री, ( खं मध्यावकाशं आरातीति । आ + रा + इन् ।) खारीपरिमाणम् । इति भरतधृतहट्टचन्द्रः ॥

खारिकं, क्ली, ( खारि + संज्ञायां कन् । ) महापारेवतम् । इति राजनिर्घण्टः ॥

खारिम्पचः, त्रि, ( खारिं खारीपरिमितधान्यमित्यर्थः पचतीति । पच् + "परिमाणे पचः ।" ३ । २ । ३३ । इति खश् + ततो मुम् ।) खारिपरिमितान्नादिपाककर्त्ता । इति व्याकरणम् ॥

खारी, स्त्री, ( खं मध्यावकाशं आरातीति । आ + रा + इन् । "कृदिकारादक्तिनः ।" ४।१।४५। इत्यस्य वार्त्तिं इति पक्षे ङीष् ।) परिमाणविशेषः । इत्यमरः । २ । ९ । ८८ ॥ यदाह तट्टीकायां भरतः ।

"पलं प्रकुञ्चकं मुष्टिः कुडवस्तच्चतुष्टयम् ।
चत्वारः कुडवाः प्रस्थश्चतुःप्रस्थमथाढकम् ॥
अष्टाढको भवेद्द्रोणो द्विद्रोणः सूर्प उच्यते ।
सार्द्धसूर्पो भवेत् खारी द्वे खार्य्यौ गोण्युदाहृता ॥
तामेव भारं जानीयात् वाहो भारचतुष्टयम् ॥"

" षोड़शद्रोणपरिमाणम् । " इत्यमरटीकायां स्वामी लीलावती च ॥ गोणीचतुष्टयम् । तत्तु षण्णवत्यधिकचतुःसहस्रपलानि । पाँचशत वार-शेर इति भाषा । इति वैद्यकपरिभाषा ॥ द्रोणचतुष्टयम् । यथा,—

"चतुराढ़को भवेद्द्रोणः खारी द्रोणचतुष्टयम् ॥"
इति स्मृतिः ॥

खारीकं, त्रि, (खारीं खारीवापमर्हतीति । "खार्य्या ईकन् ।" ५ । १ । ३३ । "केवलायाश्चेति वक्तव्यम् ।" इति वार्त्तिं इति ईकन् । ) खारीक्षेत्रम् । खारीपरिमितबीजवपनोपयुक्तक्षेत्रम् । तत्पर्य्यायः । खारीवापः २ । इत्यमरः ।२।९।१०॥

खारीवापः, त्रि, ( खारी तत्परिमितधान्यं उप्यतेऽत्र । वप् + अधिकरणे घञ् ।) खारीकः । इत्यमरः । २ । ९ । १० ॥ ( खारीं वपतीति । वप् + कर्त्तरि अण् । धान्यादिवपनकारी ॥ )

खिखिः, स्त्री, (खिरित्यव्यक्तशब्देन खेटति भीरूणां भयमुत्पादयतीति । खि + खिट् + डः । पृषोदरात् साधुः ।) किखिः । इति क्वचित् त्रिकाण्डशेषे पाठः ॥ खाँकशियाली इति भाषा ॥

खिङ्किरः, पुं, ( खिं अव्यक्तध्वनिविशेषं किरति विक्षतिभावेन शब्दं करोतीत्यर्थः । कॄ + कः । पृषोदरात् खत्वेन साधुः ।) शिवाभेदः । खाँकशियाली इति भाषा । खट्वाङ्गम् । तत्तु शिवस्याङ्गम् । वारिवालकम् । तत्तु गन्धद्रव्यम् । इति विश्वो हेमचन्द्रश्च ॥

खिट, भयभीषयोः । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-भये अकं-भयोत्पादने सकं-सेट् । ) भीषा खतो भयोत्पादना । खेटति जनो व्याघ्राद्बिभेतीत्यर्थः । खेटति व्याघ्रो जनं भीषयते इत्यर्थः । इति दुर्गादासः ॥

खिद, श प औ परिघाते । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-अनिट् ।) श प, खिन्दति दुष्टं राजा । औ, खेत्ता । इति दुर्गादासः ॥

खिद, ङ ध य औ दैन्यके । इति कविकल्पद्रुमः ॥ ( दिवां-रुधां च-आत्मं-अकं-अनिट् ।) दैन्यकमुपतप्तीभावः । ङ ध, खिन्ते तेनैव ये द्रव्यम् दीयमानं न गृह्णते । इति हलायुधः ॥ ङ य, खसुखनिरभिलाषः खिद्यते लोकहेतोरिति शाकुन्तले । औ, खेत्ता । इति दुर्गादासः ॥

खिदिरः, पुं, ( खिद्यते कृष्णपक्षेण दुःखेन तपसा वा । यथायथं व्युत्पत्तिर्ज्ञातव्या । खिद् + "इषिमदि-मुदि-खिदीति ।" उणां । १ । ५२ । इति किरच् । ) चन्द्रः । इत्युणादिकोषः ॥ दीनः । तापसः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

खिद्यमानः, त्रि, ( खिद् + ताच्छील्ये चानश् । ) खेदयुक्तः । दैन्यग्रस्तः । उपतप्तः । यथा,—

"खिद्यमानन्तु तं दृष्ट्वा सूर्य्यः कृष्णात्मजं तदा ।"
इति शाम्बपुराणे सूर्य्यस्तवः ॥

खिद्रः, पुं, ( खिद् दैन्ये + "स्फायि तञ्चिवञ्चीति ।" उणां । २ । १३ । इति रक् । ) रोगः । दरिद्रः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

खिन्नः, त्रि, ( खिद् + क्तः । ) दैन्यग्रस्तः । खेदयुक्तः । यथा, श्रीभागवते ।